श्रीविद्यापादसूत्राणि

ஸ்ரீ வித்யாபாதஸூத்ராணி

संपादक :

வாதூல. வே. ராமசந்தசர்மா

ஸ்ரீ பக்த ஸமாஜம்

6-A, ஸ்டேஷன் ரோடு

மேல மாம்பலம் : : சென்னை-33

1968] [ரூ. 0—25

॥ श्रीः ॥

श्रीमत्परमहंसपरिव्राजकाचार्यवर्य श्रीमच्छंकरभगवत्पादप्रतिष्ठितश्रीकाञ्चीकामकोटिपीठाधिपजगद्गुरुश्रीमच्चन्द्रशेखरेन्द्रसरस्वती - श्रीपादादेशानुसारेण श्रीमज्जयेन्द्रसरस्वतीश्रीपादैः क्रियते नारायण-स्मृतिः ।

जयतु जयतु नित्यं शंकराचार्यवर्यो
जयतु जयतु तस्याद्वैतविद्याऽनवद्या ।
जयतु जयतु लोके तच्चरित्रं पवित्रं
जयतु जयतु भक्तिस्तत्पदाब्जे जनानाम् ॥

சிவபிரானின் அம்சமாக ஆவிர்பவித்து, சங்கரர் (க்ஷேமத்தைக் கொடுப்பவர்) என்னும் பெயர் பூண்டு ஸ்வல்பவயதிலேயே ஸேதுவிலிருந்து ஹிமயமலை வரையில் ஸஞ்சாரம் செய்து கர்ம-உபாஸன ஞான ஸ்வரூபங்களையும், அவைகளின் கார்ய-காரணத்தன்மையும், சைவம், வைஷ்ணவம் முதலிய ஆறுமதங்

களின் ஸமரஸத்தையும், அத்வைத தத்வத்தையும் விளக்கி, நூற்றுக்கணக்கான நூல்களை இயற்றி, லோகத்திற்கு மஹோபகாரம் செய்துள்ள ஸ்ரீ பகவத் பாதாசார்யாளின் ஜயந்தீ மஹோத்ஸவத்தை மாம் பலம் ஸ்ரீ பக்த ஸமாஜத்தின் நிர்வாஹத்தினர் வழக்கம் போல், வரும் கீலக வருஷத்திலும் விசேஷ பூஜை, உபந்யாஸங்கள் முதலிய வைபவங்களுடன் கொண்டாட முன்வந்திருப்பதையும், இந்த ஸமயத்தில், ஸ்ரீ பகவத்பாதாளின் மந்த்ரமாத்ருகா புஷ்பமாலாஸ்தவம், ஸ்ரீ மாத்ருகா க்ரமஸ்துதி முதலிய ஸ்தோத்ரங்கள், ரஹஸ்யாம்நாயத்திலுள்ள ஸ்ரீ வித்யா பாதஸ்தோத்ரம், பல கட்டுரைகள் இவைகளோடு ஒரு மலரை வெளியிடுவதையும் அறிந்து ஸந்தோஷிக்கிறோம்.

ஆஸ்திகர்கள் இக் கொண்டாட்டத்தில் பூர்ணமாக கலந்து கொண்டும், இம்மலரில் வெளியாகும் ஸ்தோத்ரங்களின் மூலம் பகவானைத் துதித்தும், **'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः'** என்னும் பகவத் வசநத்தை அநுஸரித்து அவரவர்களுக்கு சாஸ்திரங்களில் விதிக்கப்பட்டுள்ள கர்மாக்களை அநுஷ்டித்தும் எல்லா மங்களங்களையும் அடைவார்களாக.

யாத்ராஸ்தானம்
கொத்த கூடம் (கம்மம் ஜில்லா)
ஆந்திரப்ரதேசம்.

நாராயண ஸ்ம்ருதி:

ப்லவங்க பால்குன சுத்ததசமி

ஓ

श्रीविद्यापादसूत्राणि

ஸ்ரீவித்யாபாதஸூத்ராணி

संपादक :

வாதூல வே. ராமசந்த்ரசர்மா

ஸ்ரீ பக்த ஸமாஜம்

மேல மாம்பலம் : : சென்னை.

இச்சிறு நூல் இது வரையில் வெளிவர வில்லை. இது பாவநோபநிஷத்தைப்போல மாநஸிகமாக அன்னையின் சரணகமலங்களை ஆராதிக்கும் பெருமையைச் சொல்லும். ஸ்ரீ வித்யோபாஸகர்கள் அநுதினமும் இதைப் பாராயணம் செய்வதற்கு அநுகூலமாக இம் மலரில் பிரசுரிக்கப் பெறுகின்றது. அன்பர்கள் அநுதினமும் பாராயணம் செய்து அன்னையின் திருவருளைப் பெற்றுத் தினைப்பார்களாக.

शिवाभ्यां नमः

श्रीविद्यापादसूत्राणि

निष्प्रपञ्चं निराभासं निर्विकल्पं निरामयम् ।
अशून्यं शून्यपरमं सदसद्भावविर्जितम् ॥ १ ॥

एतस्मादात्मनः शंभोरवतीर्णं पदद्वयम् ।
रक्तं शुक्लं च मिश्रं च तद् द्विधैव व्यवस्थितम् ॥ २ ॥

रक्तं त्वत्पदमेवात्र सकलं सिद्धिमत् प्रिये ।
शुक्लं मत्पदमेवात्र निकलं विद्धि सुन्दरि ॥ ३ ॥

रक्तशुक्ल समायोगान्मिश्रं सकलनिष्कलम् ।
एतत्समष्टिरूपं तु निर्वाणाख्यं च चिन्मयम् ॥ ४ ॥

तदेव ज्योतिषां ज्योतिश्चतुर्धा भाति भामिनि ।
कृत्वैवं तन्मयं व्याप्तं ज्योतिष्पादं वरानने ॥ ५ ॥

वामभागः शिवायास्तु रात्र्यविद्यात्मना स्थिता ।
दिवा विद्यात्मना भागो दक्षिणस्य शिवस्य तु ॥ ६ ॥

भावविष्फारसिद्ध्यर्थमेतयोर्विपरीतयोः ।
एवं भूतोदयो भोगमोक्षादिनिखिलं भवेत् ॥ ७ ॥

स्वरन्ध्राद् बहिरन्तश्च परतः परमार्थतः ।
सर्वानन्दप्रकाशात्मा तथा तत्सामरस्यतः ॥ ८ ॥

निर्वाणादिचतुर्भेदस्तत्पीठाकारमाख्यया ।
ज्योतिः प्रकाशमेवैतच्चिन्तयेत् परमं महः ॥ ९ ॥
प्रकाशानन्दसरितो यच्छिवं शिवयोस्तयोः ।
संकल्पमिथुनीभावादिदं तदभवद् द्विधा ॥ १० ॥
रक्तं तद् दिनकृच्छक्तिरूपिणी द्वादशात्मिका ।
कोमला निस्तुलाकारा पादमुद्राकृतिस्तथा ॥ ११ ॥
शुक्लं तदेव पुंश्चन्द्रलक्षणा षोडशात्मिका ।
षोडशाभ्यां प्रकाशाभ्यां प्रकाशानन्दरूपिणी ॥ १२ ॥
रक्तशुक्लसमायोगादष्टाविंशात्मिका पुनः ।
तेजो योगा त्रिरूपा सा नियतैकैव योगतः ॥ १३ ॥
द्वात्रिंशात्मतया चैव स्थिता क्लीबानलात्मिका ।
सुषुम्नारन्ध्रकं ज्योतिस्तन्तुरूपं विचिन्त्यताम् ॥ १४ ॥
इडया वामभागोत्था शुक्लापादोद्भवा सुधा ।
तत्तत्पीठगतान्येवमाप्यायति शीतला ॥ १५ ॥
तथा पिङ्गलया दक्षा रक्ता पादोद्भवा सुधा ।
सुषुम्नारन्ध्रगं ज्योतिर्लिङ्गमाप्यायत्यसौ ॥ १६ ॥
आदिब्रह्मकलाचन्द्रे प्रविष्टा षोडशात्मिका ।
आदिशक्तिकलासूर्ये प्रविष्टा द्वादशात्मिका ॥ १७ ॥
आदिशंभुकलावह्नौ प्रविष्टा दशधामता ।
पुंमायाशंभुरूपेण त्रिधैवं पादपद्धतिः ॥ १८ ॥

तन्मध्ये भावयेत् त्र्यश्रं यवमात्रप्रमाणकम् ।
एवं रूपामृतासारे कुण्डल्यग्रे वरानने ॥ १९ ॥
मूर्धस्थां शक्तिमुत्थाप्य मूलपद्मे नियोजयेत् ।
तत्रस्थं त्रसरेण्वाभमात्मानमनलप्रभम् ॥ २० ॥
गृहीत्वा योजयेन्मध्ये भावयेदान्तरं शिवे ।
तस्मिन् विलीनचित्तस्तु जायते वृत्तिवर्जितः ॥ २१ ॥
सोमसूर्यपदं भित्वा परे शंभुपदे वसेत् ।
सोऽहंभावपरः शंभुरुक्तलक्षणलक्षितः ॥ २२ ॥
कृत्वाहं भावमुत्सृज्य शंभुभावे स्थितो भवेत् ।
सच्चित्सुखमयः शंभुः स्त्रीरूपं सर्वजन्तुषु ॥ २३ ॥
सर्वदा भासते यस्मात् तन्मयं त्वखिलं जगत् ।
तत्संनिधिः समस्तेषु शंभुसत्तावभासते ॥ २४ ॥
काशते काशते चेति चितिश्छन्दपरा विभोः ।
एतत् तच्चित्तयोरैक्यं तत्रानन्दो विराजते ॥ २५ ॥
यत्रानन्दो भवेद् भावस्तत्र चित्सत्तयोः स्थितिः ।
या चित् सत्तैव संप्रोक्ता सा सत्तैव चिदुच्यते ॥ २६ ॥
एवं सच्चित्तयोरैक्ये स्थितिभूते वरानने ।
आनन्देन समायोगा अचिरेणैव जायते ॥ २७ ॥
तदानन्दमयः स्वात्मा तदभिन्नो विराजते ।
एवं शंभुमयो भावः सर्वतन्त्रे स्थिते शिवे ॥ २८ ॥

सर्वशक्त्युपभोगीव जीवन्मुक्तो महीं चरेत् ।
कृतासनः कृतन्यासः कृतात्मा गुर्वनुज्ञया ॥ २९ ॥
परान्वयक्रमेणैव कुर्याच्छ्रीचक्रतर्पणम् ।
सितो वामेऽरूणो दक्षे वराभययुतो गुरुः ॥ ३० ॥
श्वेताम्बुजासनगतो रक्तशाक्तिस्त्रिलोचनः ।
पञ्चमुण्डधरः स्रग्वी हृदि ध्येयः स्थिरासनः ॥ ३१ ॥
एवं ध्यात्वा शिवं देवमात्मना सह सद्गुरुम् ।
पञ्चप्रणवमन्त्रेण मन्त्रितेनार्घ्यवारिणा ॥ ३२ ॥
आत्मानमपि संप्रोक्ष्य पूजोपकरणानि च ।
पञ्चाङ्गुलिमितं कृत्वा चतुरश्रं च मण्डलम् ॥ ३३ ॥
दिक्षु मध्ये ततः पञ्चरत्नमन्त्रैर्विदिक्षु च ।
मध्ये च पञ्चप्रणवं विदध्यान्मण्डलार्चनम् ॥ ३४ ॥
पात्रं गन्धोदकैः पूर्णं प्रणवानां च पञ्चकम् ।
तन्मध्ये न्यस्य रत्नानि साधारं स्थापयेदिह ॥ ३५ ॥
गुरुद्वयं युगं चात्र नवात्मयुगलं तथा ।
प्रदर्शयेद् योनिमुद्रां चरणद्वयनिर्गताम् ॥ ३६ ॥
रक्तशुक्लोभयकरां सुधां नेत्रद्वयाध्वना ।
पाययित्वार्घ्यतोयेन श्रीचक्रं तेन तर्पयेत् ॥ ३७ ॥
तच्चतुर्धानुसंधाय विश्वं चरणवैभवः ।
द्वात्रिंशात्मिकया शक्त्या युक्तं शंभुं समर्चयेत् ॥ ३८ ॥

बलिं निवेद्य विधिवन्नैवेद्यं च निवेदयेत् ।
परामृतेन तज्ज्योतिर्लिङ्गमाप्याययेत् सुधीः ॥ ३९ ॥

चतुर्विधमिदं विद्यारहस्यं चरणक्रमम् ।
जिह्वाग्रे वर्तते यस्य स पूज्यो मत्समः प्रिये ॥ ४० ॥

अपि सर्वागमान् ज्ञात्वा सदाचारपरोऽपि वा ।
पादसूत्रविहीनस्य प्रणामं नैव कारयेत् ॥ ४१ ॥

वृथा दीक्षा वृथा ज्ञानं वृथा होमो वृथा जपः ।
यज्ज्ञात्वा पादसद्भावं कुर्वाणस्य महेश्वरि ॥ ४२ ॥

फलमेवं महादेवि शांभवं भक्तिशालिना ।
प्रकाशं याति विमलं ज्ञानमेतन्निरामयम् ॥ ४३ ॥

तस्मात् सर्वप्रयत्नेन पादसूत्रामिदं पठेत् ।
सर्वपापविनिर्मुक्तः सिंद्धि सर्वामवाप्नुयात् ॥ ४४ ॥

सर्वं वा श्लोकमेकं वा श्लोकार्धं पादमेव वा ।
यः पठेत् प्रयतो नित्यं स भवेत् कौलिकः प्रिये ॥ ४५ ॥

इति श्रीरहस्याम्नाये महामाहेश्वरभट्टारकस्य
श्रीविद्यापादसूत्रं संपूर्णम्

शिवाभ्यां नमः

श्रीविद्यापादसूत्रभावना

श्रीविद्यापादसूत्रभावना प्रारभ्यते—ब्राह्मे मुहूर्ते उत्थाय तद्विक्षेपात्मकं विश्वं चानुसंदध्यात्। तद्यथा—

निष्प्रपञ्चं निराभासं निर्विकल्पं निरामयम्।
कार्यकारणनिर्मुक्तं हेतुलक्षणवर्जितम्॥

इति प्रकाशानन्दसामरस्यात्मकं स्वप्रकाशशिवशक्तिपञ्चकरणपञ्चवक्त्रषडध्वादिसमस्तकल्पनारहितं भावाभावशब्दाभिधानशून्यं स्वयमशून्यं परमार्थसत्तास्फूर्तिलक्षणपरिपूर्णानन्दविग्रहं महाप्रकाशस्वभावं स्त्रीपुंनपुंसकाद्याभिधनार्हं स्वेच्छया निर्मितसमस्तप्रपञ्चसृष्टिस्थितिसंहारतिरोधानानुग्रहाख्यकार्यपञ्चकस्वर्गापवर्गादिनिर्वाहकतया तेषु तेषु व्याप्याधारतया च चरणम्; परस्य वस्तुनः संज्ञेयमुच्यते। तस्मिन्नेवंविधे चरणे आत्मनः सह सिद्धमैक्यमलमवाप्याङ्गपरिक्षालनार्थं "हंसोऽहम्" इत्यनुसंदध्यात्।

तद्यथा—

दिग्देशकालजाग्रदाद्यवस्थावस्तुषु निमिषत्वनिमिषत्सु चराचरेषु ब्रह्मादिशिवान्तेषु सकलेषु निष्कलेषु मिश्रितेषु सदानन्दस्फुरणानुग्राहतयानुप्रविष्टः जपादिरञ्जितस्वच्छमणिवत् सकलाद्युपाध्यनुरक्ततया सकलनिष्कलनिष्कलसकलनिष्कलनिर्वाणाभिधं

भजति इत्यनुसंधाय, निर्वाणनिष्कलसकलनिष्कसकलविद्याचतुष्टयं जप्यात्; जपकाले।

पूजावेलायामेवं पूजयेच्च; शिरसि निर्वाणचरणाय नमः, मिश्रचरणाय नमः, शुक्लचरणाय नमः, रक्तचरणाय नम इति विद्याचतुष्टयम्।

पुनः दहराकाशकुशेशये चेतनाचैतन्यात्मकौ शिवाशिवौ प्रकाशानन्दस्वरूपौ अमूर्तौ मूर्तिमन्तौ निदानभूतौ विश्वस्य माता-पितरौ श्रीचरणप्रकाशस्वगुरुतच्छक्तिरूपौ स्वेच्छया कार्यवशात् सकलीकृतौ आगमोक्तप्रकारेण तत्तल्लक्षणलक्षितौ। यथा—

"हृदयाम्बुजमध्यस्थकर्णिकापीठवासिनम्।
शिवरूपं श्वेतवस्त्रमाल्यभूषानुलेपनम्॥

दयार्द्रदृष्टिं स्मेरास्यं वराभयकराम्बुजम्।
वामाङ्कगतया पीतवपुषारुणवेषया॥

पद्मवत्या वामकरे शक्त्या दक्षभुजावृतम्।
एवं ध्यात्वा गुरुं वन्दे सानन्दं चिन्तयेत् सुधीः॥"

इत्यागमोक्तलक्षणं भावयेत्।

ततः भुक्तिमुक्तिप्रदौ तत्तन्मन्त्राभ्यां समस्तकरणसरणिनिग-तितैः भावपुष्पैः अभ्यर्चयेत्, इति गुर्वर्चनप्रकारः।

ओं सर्वविघ्नकृद्भ्यः सर्वेभ्यो हुंफट् स्वाहा इति विघ्नोत्सारण-मन्त्रमुक्त्वा, परानन्दलक्षणां संविन्मयीम् अमृतधारावाहिनीं परां कलां संचिन्तयेत् ; इति बलिदानप्रकारः । इत्यनन्वयपरसंवित्क्रमानुपूर्वी ।

अथान्वयक्रमानुसंधानानुपूर्वीं निरूप्यते ; तद्यथा—अध्यात्माधिभूताधिदैवतेषु व्यष्टिसमष्टिसमष्टिव्यष्ट्यात्मकपिण्डवत् अरूपरूपरूपातीतबिन्दुनादशक्तिशिवस्थानजन्यं समस्तभावसहितं समस्तदेवतापुञ्जपञ्चरं स्थूलसूक्ष्मपरावस्थापन्नविश्वशरीरमात्मशरीरं संकल्प्य, तस्मिन्नेतस्मिन् मूलाधारसरोरुहादा ब्रह्मबिलादुद्गता षडाधारषड्ग्रन्थिपरिमण्डिता मूलाधारनिषण्णपरबिन्दुकन्दा सार्धकोटित्रयमरीचिकिंजल्का ऊर्ध्वमुखा उपर्युपरि संश्लिष्टवह्निसूर्येन्दुकर्णिका नवप्रकृत्यात्मकैः नवात्मबीजनवकैः परिकल्पितबीजकोशा आम्नायरसानन्दमकरन्दरसास्वादमत्तयोगीन्द्रषट्पदा संसारश्रमापनोदिपरमनिर्वाणसौरभा भावनीया ; इति श्रीचरणावासपद्मस्थितिः ॥

ततः, तत्कर्णिकायां दक्षिणोत्तरतः चेतनाचैतन्यात्मकयोः शिवयोरङ्गभूतशिवाराज्यविद्याविद्ये च दक्षवामभागौ भाव्येत । तत्र अविद्यारात्री शिवाया निजाङ्गभूतौ, विद्यादिवसौ शिवस्य निजाङ्गभूतावित्येवमगन्तव्यम् । तनोः वामभागः शिवाया निजमङ्गम्, दक्षभागः शिवस्य निजमङ्गम् ।

तत्र भावविष्फारसिद्ध्यर्थमेतयोः भागयोः परस्परविक्रीतयोः शिवाशिवौ स्थितिमनुभवतः । एवं सति वामभागः शिवस्य, दक्ष-

भागः शिवायाः । इदानीं तु अविद्यारात्री शिवस्य; विद्यादिवसौ शिवाया इति ॥

एवं सति भोगमोक्षादिनिखिलं निष्पद्यते । पुनर्मध्ये नाल-बिलान्तरे तयोः विद्याविद्ययोः दिवाराञ्योश्च साम्येन स्थितिं भावयेत् ।

तत्र, अविद्यारात्री पद्मकर्णिकाया वामभागमारभ्य वामपाद-शाखान्तं व्याप्यावस्थिते । तथा विद्यादिवसौ पद्मकर्णिकाया दक्ष-भागमारभ्य दक्षपादशाखान्तं व्याप्यावस्थितौ भाव्यौ । एतत् चतुष्टयं पद्मकर्णिकाया मध्यमारभ्य आमूलं साम्येनावस्थितं भावयेत् ।

पुनः पद्मकर्णिकाया दक्षिणोत्तरमध्यमार्गेषु रक्तशुक्लमिश्रवर्णा त्मकानि पिङ्गलेडासुषुम्नाख्यनाडीत्रयविवरेषु तत्तन्मूलमारभ्य षडा-धारषड्ग्रन्थिप्रदेशसंस्थितानि प्रत्येकं षडबीजानि चतुरश्चार्धचन्द्र-त्रिकोणषट्कोणवृत्तनादात्माकाराणि पीतश्वेतरक्तनीलधूम्रश्वेत-वर्णानि । लवरयहसाक्षरोज्ज्वलानि ब्रविरुईसहि इत्यक्षरात्मकब्रह्म-विष्णुरुद्रेश्वरसदाशिवहिरण्यगर्भाख्यमनोऽन्तःषटतत्त्वात्मकानि उपर्यु-परि संस्थितप्रेताधिष्ठितानि । ओजापूकापराख्यानि श्रीचरणा-सनानि भावयेत् । तत्र पराख्यं नादपद्माकारपद्मकर्णिकामध्यभागमध्य-स्थमेव श्रीचरणस्य मध्यमासनं भवति । अन्यान्यपि क्रमेणासनानि ॥

ततः, ब्रह्मरन्धाद् बहिः आज्ञान्तात् परतः पूर्वनिरूपित सर्वात्मकानन्दात्मकप्रकाशात्मकतत्सामरस्यात्मकनिष्कलसकल तत्सा-

मरस्यात्मकपरिपूर्णानन्दानुभवात्मकं सर्वतो ज्योतिःप्रकाशं गतिभक्षणगुणयोगात् चरणशब्दोपलक्षितं परमं महः संचिन्त्य, प्रकाशानन्दतत्सामरस्यात्मकं सरित् त्रयमविच्छिन्नं पूर्वनिरूपितपद्मकर्णिकागतपरपीठत्रयोपरि दक्षिणवाममध्यक्रमेण आकाशगङ्गाप्रवाहवत् संततिरूपेण संततं निपतति ॥

पुनः, तयोः प्रकाशानन्दसरिद्रूपयोः चेतनाचैतन्यात्मकयोः चन्द्र-चन्द्रिकयोरिव अविभागमापन्नयोः शिवयोः निष्कलारूयं संकल्प्य मिथुनीभूतयोः वीर्यं त्रिधा रक्तशुक्लतत्सामरस्यात्मना स्वीये स्वीये स्थाने निपतति ॥

तत्र, महाप्रकाशरूपायाः शिवायाः रक्ताधिके स्ववीर्ये प्रतिबिम्बिता प्रकाशकणिका रजोयोगात् द्वादशात्मिका विश्वप्रसवनयोगात् सविता शक्तिरूपा अहर्जाता शिवशुक्लपादवत् अतिकोमला ऽद्वङ्गुलायामपादमुद्राकृतिर्भवति ॥

तथा, महानन्दात्मकशिवस्याच्छो शुक्लाधिके स्ववीर्ये प्रतिबिम्बिता एका आनन्द कणिका शुक्लयोगात् षोडशात्मिका विश्वस्याप्यायनयोगात् चन्द्रमाः पुंरूपा पूर्वोक्तलक्षणलक्षितपादमुद्राकृतिर्भवति ॥

ततः, प्रकाशानन्दसामरस्यात्मकशंभोः तेजःकर्णिका एका मध्यगतपरपीठोपरि निषण्णा रक्तशुक्लसाम्यरूपे प्रतिबिम्बिता रजःशुक्लयोगात् अष्टाविंशात्यात्मिका परयोगात् एकात्मिका इतरासनयोगात्

त्मिका आहत्य द्वात्रिंशदात्मिका नपुंसकरूपा पक्षद्वयोपसंहारयोगात् वह्निरूपा सुषुम्नानालबिलान्तस्था ज्योतिस्तन्तुरूपा व्याप्तविश्वान्तराला आदिमध्यान्त रहिता अनुसंधेया ॥

तथा, ज्ञातृज्ञानभोक्तृबीजक्षेत्रज्ञविद्यादिवसात्मामृतशान्तादितिदेवपुंलिङ्गाङ्कितजीवन्मोक्षादिकममृतात्मकं शुक्लश्रीपादसंभवं द्रष्टव्यम् । ज्ञपेज्ञानभोग्यान्तरक्षेत्राविद्यादिवसयोः स्मरस्त्रीलिङ्गाङ्कित प्राणभोगादिकममृतात्मकं रक्तश्रीपादसंभवं द्रष्टव्यम् । एतत् त्रयसमष्टिरूपं लयस्थानं सर्वतो व्याप्तं निर्वाणाख्यं द्रष्टव्यम् । गुरुश्रीपादसंभवमखिलं निष्कलं द्रष्टव्यम् । तत्सामरस्योद्भवमखिलं सकलनिष्कलात्मकं द्रष्टव्यम् । इत्येवं प्रपञ्चे चतुर्विधा श्रीचरणव्याप्तिरनुसंधेया ॥

तत्र, शुक्लश्रीपादोद्भवा शुक्लामृतधारा इडानाडीवर्त्मना आवामपादशाखमतिशीतला श्रीचरणासनात्मकतत्तत्पीठगतसमस्तदेवतागणमाप्यायति । तथा, रक्तश्रीपादोद्भवा शुक्लामृतधारा पिङ्गलानाडीवर्त्मना आदक्षपादशाखमतिशीतला श्रीचरणासनात्मकतत्तत्पीठगतसमस्तदेवतागणमाप्यायति । तथा, पादद्वयोद्भता सितरक्तामृधारा सुषुम्नानाडीवर्त्मना आमूलमतिशीतला सुषुम्नारन्ध्रगतज्योतिर्लिङ्गमाप्याययति । तथा, श्रीचरणासनात्मकतत्तत्पीठगतसमस्तदेवतागणमाप्याययति ॥

तत्र, चरणशाखा प्रपञ्चात्मिका द्रष्टव्या। व्यतिरिक्तं मनोजीवात्मकं चराचरम्। अन्यत् सर्वं श्रीचरणसंभवमनुसंधेयम्॥ एवं श्रीचरणं ध्यात्वा श्रीचरणविद्यां मानसैः गन्धपुष्पधूपदीपोहारैः अभ्यर्चयेत्॥

तद्यथा; पृथ्वीसंभवं गन्धवन् सर्वं घ्राणेन्द्रियोपलक्षणमखिलं गन्धपुष्पधूपात्मकं कल्पयेत्। ग्रहनक्षत्रसोमसूर्यात्मकं रूपेन्द्रियोपलभ्यमखिलं ज्योतिर्गणं तेजोभूतसंभवं दीपं कल्पयेत्। तथा, रसनेन्द्रियगोचरमाप्यभूतं रसवत्प्रदार्थजातमखिलं नैवेद्यं कल्पयेत्। तथा कर्मेन्द्रियसंभवं वायुभूतोद्भवमखिलं स्तोत्रनमस्कारादिकं कल्पयेत्। तथा परनादविकृतात्मकमाकाशसंभवमखिलं गतिं कल्पयेत्॥

एवं, सर्वात्मकसकललोकभोग्यात्मकविश्वपिण्डनिर्माणस्थितिनिर्वापणं कालकलानियत्यविद्यारागाख्यकञ्चुकपञ्चकं श्रीचरणयुगलं श्रीचरणबुद्ध्या आराधयेत्, ध्यायेत्, जपेच्च। तदुद्भूतामृतधारासारेण त्रिविधेन शरीरं सिञ्चेत्। विश्वमात्मबुद्ध्या संभावयेत्। हिंसेर्ष्यारागद्वेषलोभमोहस्तम्भमायादिकं सर्वं सर्वात्मनः स्वस्य भावनेन्धनदीप्ते देहभेदाग्नौ जुहुयात्॥ श्रीगुरुपादुकाभ्यां नमः॥

वन्दे गुरुपदद्वंद्वमवाङ् मनसगोचरम्।
रक्तशुक्लप्रभामिश्रमतर्क्यं त्रैपुरं महः॥

इति श्रीरहस्याम्नाये महामाहेश्वरभट्टारकस्य
श्रीविद्यापादसूत्रभावना संपूर्णा